CAREERINDIA


# SANSKRIT

**(Second Language)**

***Maximum Marks : 80***

***Time Allowed : Three Hours***

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first **15** minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

---

*This paper comparise of **two** Sections : **Section A** and **Section B**.*

*Attempt **all** the questions from **Section A**.*

*Attempt **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and **any two** other questions from the same books you have compulsorily chosen.*

*The intended marks for questions or parts of questions are given in brackets [ ].*

---

**SECTION—A (40 Marks)**

*(Attempt **all** questions from this Section.)*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु एकं विषयम् आधृत्य **150–200** शब्दपरिमितं लघुनिबन्धं **संस्कृतभाषया** लिखत :—

(i) स्वस्य अभिप्रायम् अन्येभ्य:, अन्येषाम् अभिप्रायं स्वयं ज्ञातुं भाषा मुख्या भवति। भाषासु संस्कृतभाषा सुसंस्कृता इति वर्णयित्वा निबन्धं लिखत।

(ii) भारतं स्वतन्त्रं कर्तुं बहव: प्राणार्पणं कृतवन्त:। तेषु एकस्य महापुरुषस्य जीवनगाथां वर्णयत।

(iii) परिसरस्य संरक्षणं जीवकुलस्य रक्षणं भवति। अत: कथं भू-जल-वायुमालिन्यानि भवन्ति ? निवारणोपाया: च के ? इति विषये निबन्धं लिखत।

(iv) विद्या कल्पलता इव सर्वं साधयति। तस्मात् विद्याया: महत्त्वं, विद्यार्जनं च अधिकृत्य निबन्धं लिखत।

www.careerindia.com

---

**This Paper consists of 8 printed pages.**



*© Copyright reserved.*

(v) (Picture composition) प्रस्तुतं चित्रम् आधृत्य **संस्कृतभाषया** निबन्धमेकं लिखत :–



**Question 2**

Write a letter in **Sanskrit** in approximately **120** words on any **one** of the following topic :— [7]

अधोलिखितयोः विषययोः एकं विषयम् आधृत्य **संस्कृतभाषया** पत्रं लिखत :—

(i) भवान्/भवती कानिचन पुस्तकानि प्राप्तुम् इच्छति। तानि प्रेषयितुं प्रार्थयित्वा पञ्चमीप्रकाशनस्य व्यवस्थापकं प्रति पत्रं लिखत।

(ii) भवान्/भवती विरामसमये कृतसंस्कृत प्रचारकार्यं वर्णयित्वा मित्रं प्रति पत्रं लिखत।

**Question 3**

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

अधोलिखितम् अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि यथासंभवं स्वशब्देषु **संस्कृतभाषया** देयानि :—

कश्चन राजा। तस्य मन्त्री वृद्धः। तस्मात् सचिवपदाय उत्तराधिकारिरूपेण योग्यः तरुणः चेतव्यः इति राज्ञा चिन्तितम्। तत् कार्यं मन्त्रिणे एव अर्पितम्।

मन्त्री अनेकान् युवकान् निमन्त्रितवान्। बहवः युवकाः मन्त्रिस्थानप्राप्त्यर्थम् आगताः। तेषु चत्वारः चिताः अभवन्। परम् एतेषु कोपि एकः चेतव्यः आसीत् सचिवेन।

www.careerindia.com

चतुरः मन्त्री तरुणान् आहूय तेभ्यः एकैकं बीजं दत्वा अवदत् – 'भवद्भ्यः एकैकस्मै अपि एकैकं बीजं ददाम्यहम्। तत् कुम्भे आरोप्य सस्यं वर्धनीयं भवद्भिः। यः उत्तमतया सस्यवर्धनं कुर्यात् सः एव मन्त्रिपदाय चेष्यते' इति। एकैकस्मै अपि एकैकः कुम्भः तेन दत्तः।

चत्वारः अपि तरुणाः बीजं स्वीकृत्य गृहं प्रतिगतवन्तः। कुम्भे उत्कृष्टां मृत्तिकां संस्थाप्य तन्मध्ये बीजं स्थापितं तैः। प्रतिदिनं जलसेचनमपि कृतम्। तेषु तरुणेषु सुकीर्तिः अपि अन्यतमः। सः अपि एतत् सर्वम् अकरोत्।

वर्षम् अतीतम्। त्रयः युवकाः उत्तमैः सस्यैः युतेन कुम्भेन सह आगताः आसन्। किन्तु सुकीर्तिः सस्यरहितेन कुम्भेन सह म्लानमुखः सन् उपस्थितः। वृद्धः मन्त्री चतुर्णामपि कुम्भं सकृत् वीक्ष्य सुकीर्तिम् अपृच्छत्-'भोः भवतः कुम्भः किमर्थं रिक्तः ? किं त्वया सस्यवर्धनाय परिश्रमः न कृतः ?' इति।

तदा सुकीर्तिः विषादेन अवदत्- 'मान्यवर ! मया श्रद्धया प्रयासः कृतः एव। मम प्रयत्ने न कोपि लोपः। किन्तु दौर्भाग्यं नाम मह्यं दत्तं बीजम् अङ्कुरितं न जातम् एव। अतः मया सस्यवर्धनं कर्तुं न शक्यम् अभवत्। क्षन्तव्यः अहम्।

तदा मन्त्री अवदत् – 'साधु ! भवतः सत्यनिष्ठा श्लाघ्या। त्वमेव मन्त्रिपदाय अर्हः।' इति।

प्रवृत्तं सर्वं ज्ञात्वा राजा अपृच्छत् – 'सस्यवर्धने तेषां त्रयाणामपि आसीत् विशेषपरिश्रमः। सुकीर्तिः तु सस्यवर्धने असफलः। तथापि तस्मै कथं मन्त्रिपदं दीयते ?' इति।

तदा वृद्धमन्त्री अवदत् – 'वस्तुतः मया चतुर्भ्यः अपि सिकतासु दग्धं बीजमेव दत्तम् आसीत्। अतः तेषु किमपि बीजम् अङ्कुरितं भवितुं न अर्हेत् एव। किन्तु ते त्रयः अन्यत् बीजं कुम्भे आरोप्य सस्यं वर्धितवन्तः। सुकीर्तिः सत्यनिष्ठः। अतः सः निष्कपटः सन् स्वस्य असाफल्यम् अङ्गीकृतवान्। उन्नते पदे ये तिष्ठेयुः ते सत्यनिष्ठाः स्युः अवश्यम्। तस्मात् मया सुकीर्तिः चितः' इति।

(i) वृद्धमन्त्री तरुणेभ्यः बीजं दत्त्वा किम् अवदत् ? [2]

(ii) तरुणाः कथं सस्यं वर्धितवन्तः ? [2]

(iii) सुकीर्तिः विषादेन किम् अवदत् ? [2]

(iv) किमर्थं बीजं न अङ्कुरितम् ? [2]

(v) राजा मन्त्रिणं किम् अपृच्छत् ? [2]



www.careerindia.com

CAREERINDIA

**Question 4**

Answer the following questions according to the instructions :- [8]

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरयत :—

(i) अत्र एतत् शुद्धं वाक्यम् भवति।

(a) ईश्वर: कैलासे अधितिष्ठति।

(b) ईश्वर: कैलासम् अधितिष्ठति।

(c) ईश्वर: कैलासेन अधितिष्ठति।

(d) ईश्वर: कैलासात् अधितिष्ठति।

(ii) 'त्वं फलं खादसि' अस्य वाच्य परिवर्तनम् एवं भवति।

(a) त्वया फलं खाद्यते

(b) त्वया फलं खाद्यन्ते

(c) त्वया फलं खादिष्यसे

(d) त्वया फलं खाद्यसे

(iii) 'सर्वेष्वेव' अत्र सन्धे: विभाग: एवं भवति।

(a) सर्वे + अष्वेव

(b) सर्व + एष्वेव

(c) सर्वेष् + वेव

(d) सर्वेषु + एव

(iv) "बाल: क्षीरं पिबति" अस्य लृट् लकारेण परिवर्तनम् एवं भवति।

(a) बाल: क्षीरं पास्यति

(b) बाल: क्षीरं पास्यन्ति

(c) बाल: क्षीरं पिबतु

(d) बाल: क्षीरं पिबिष्यति

www.careerindia.com

CAREERINDIA

(v) "जश्" प्रत्याहारे एतानि अक्षराणि सन्ति।

(a) झ, भ, घ, ढ, ध

(b) ख, फ, छ, ठ, थ

(c) ज, ब, ग, ड, द

(d) श, ष, स, ह

(vi) "वसन्तसमये" अस्य विग्रहवाक्यम् एवं भवति।

(a) वसन्तस्य समये

(b) वसन्तेन समये

(c) वसन्तः समये

(d) वसन्ताय समये।

(vii) "त्यक्तवान्" इत्यस्य प्रकृति-प्रत्यय विभजनम् एवं भवति।

(a) त्यज् + क्त

(b) त्यज् + शानच्

(c) त्यज् + तव्यत्

(d) त्यज् + क्तवतु

(viii) त थ द ध वर्णानाम् उत्पत्तिस्थानमिदं भवति।

(a) दन्ताः

(b) कण्ठः

(c) मूर्धा

(d) दन्तोष्ठम्।

www.careerindia.com

CAREERINDIA

**SECTION—B (40 Marks)**

*Questions from only **two** of the following textbooks are to be answered.*

*Attempt **four** questions from this section.*

*You must answer at least **one** question from each of the **two** books, you have studied and any **two** other questions from the same books that you have chosen .*

## संस्कृतवाणी भाग-4

### दैवानुग्रहम्

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

सर्वै: उपेक्षित: क्षुधापीडित: हरिशर्मा रात्रौ स्वभार्याम् एवम् अवदत्-"प्रिये ! अहं दरिद्र:, मूर्ख: च। अत: अहम् उपेक्षित:। तस्मात् कपटमाचरिष्यामि येनाहमस्य बहुमतो भवेयम्। त्वं सूक्तसमये आगत्य अहं ज्योतिश्शास्त्रपारङ्गत: इति तस्मै निवेदय"।

(i) हरिशर्मा कीदृश: पुरूष: आसीत् ? कुटुम्बनिर्वहणार्थं तस्य जीवनोपायमार्ग: किमासीत् ? [2]

(ii) स्थूलदत्तस्य सुताया: विवाहोत्सवसमये हरिशर्मा मनसि किं चिन्तितवान् ? [2]

(iii) राजा किमर्थं हरिशर्मणे ग्रामान् दातुं निश्चितवान् ? तदा सचिवा: किमवदन् ? [3]

(iv) जिह्वा का ? सा हरिशर्मण: पादयो: निपत्य किमुवाच ? [3]

### आचार्य देवो भव

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

"अध्यापक: एतेषु पुरूषेषु अन्यतम:। स: छात्राणाम् उत्तमभविष्यं रचयति। उत्तम राष्ट्र-नेतॄणां निर्माणं करोति। स: असमशिलां तक्षणेन सुन्दरमूर्ते: रूपं ददाति।''

(i) आदर्शव्यक्तय: समाजे किं कुर्वन्ति ? मानव: स्वजीवने कै: सह संसर्गं करोति ? [2]

(ii) शिष्यस्य आद्यं कर्तव्यं किम् ? गुरो: कृपया के के निष्णाता: जाता: ? [2]

(iii) प्राचीनकाले केषाम् अतीव महत्त्वम् आसीत् ? तेषां महत्त्वस्य विषये लिखत ? [3]

(iv) आचार्यस्य सम्मान: किमर्थम् अस्माभि: करणीय: ? [3]



www.careerindia.com

CAREERINDIA

## अस्माकं देश:

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

अस्माकं देश: भारतवर्षम् अस्ति। अस्य प्राचीनं नाम आर्यावर्त: आसीत्। पुरा दुष्यन्त: नाम राजा अभवत्।

(i) भरत: कस्य पुत्र: आसीत् ? कथम् अस्माकं देशस्य नाम भारतम् इति जातम् ? [2]

(ii) हिमालय: कुत्र अस्ति ? स: कथं सुशोभते ? [2]

(iii) अस्माकं देशे के जन्म अलभन्त के के विश्वविख्याता: सन्ति ? किम् अस्माकं चित्तम् आकर्षयति ? [3]

(iv) भारतदेश: कदा स्वतन्त्र: अभवत् ? देशस्य शासनपद्धत्या: विषये लिखत। [3]

## संस्कृतवाणी भाग-5

### अमृतवाहिनी

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

सुभाषितं नाम भाषितम्। संस्कृतवाङ्मयस्य सुभाषितानि सुप्रसिद्धानि भवन्ति। अमरूक-भर्तृहरि: प्रभृतिभि: साहित्यकारै: एतदर्थं शतकसाहित्यम् एव विरचितम्।

(i) साक्षात्पशु: क: भवति ? केषां भागधेयम् इति सुभाषितकारेण उक्तमस्ति ? [2]

(ii) स्वप्नेऽपि सिंह: किं न चिन्तयति ? [2]

(iii) खलस्य साधो: च विपरीतस्वभावं किम् ? [3]

(iv) सर्पा: पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति
कन्दै: फलैर्मुनिवरा: क्षपयन्ति कालं
सन्तोष एवं पुरुषस्य परं निधानम्।।

भावार्थं लिखत [3]

www.careerindia.com

CAREERINDIA

## चतुरः रामकृष्णः

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

रामकृष्णस्य उत्तरं किमासीत् ? नायकः किमर्थं तस्मै गृहं गन्तुम् अनुमतिं दत्तवान् इति ज्ञातुं ते नरभक्षका, स्वनायकस्य समीपम् अगच्छन्।

(i) रामकृष्णः कस्य आस्थानकविः आसीत् ? सः कथं विकटकविः इति प्रसिद्धः अभवत्। [2]

(ii) रामकृष्णः किमर्थं वनं गच्छति स्म ? [2]

(iii) रामकृष्णं प्रति नायकः उच्चस्वरेण किम् उक्तवान् ? [3]

(iv) रामकृष्णः यदा वनमध्ये आसीत् तदा किमभवत् ? रामकृष्णः भयहेतुकं नायकं किम् अपृच्छत् ? [3]

## युक्तिः शक्तेः गरीयसी

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

पुरा जनसंख्या न्यूना आसीत्। न केवलं वनानां संख्या अधिका आसीत् तानि सान्द्रानि आसन्। तेषु वनेषु अनेके वनमृगाः निर्भयेन आवासं कृत्वा सुखेन जीवन्ति स्म।

(i) "युक्तिः शक्तेः गरीयसी" इत्यस्य आभणकस्य अर्थं विवृणुत। [2]

(ii) कुशालः कः ? तस्य वनगमनकारणं किमासीत् ? [2]

(iii) स्वप्रतिबिम्बं दर्पणे दृष्ट्वा भीतः राक्षसः कुशालं किं प्रार्थितवान् ? [3]

(iv) कुशालः राक्षसाय किम् उक्त्वा स्वसमीपस्थं दर्पणं दर्शितवान् ? [3]

www.careerindia.com